## अध्याय :- ६२ Chapter-62

शौनक उवाच ।।[१]
[२]सूत श्रुत्वा पुरास्माभिरुत्पत्तिर्गणपस्य च ।।
क्षेत्रनाथः कथं जज्ञे वदैतच्छृण्वतां हि नः ।। १

सूत उवाच[३] ।।
यदा[४] दारुकदैत्येन पीडयमाना दिवौकसः ।।
शिवे देव्या सहासीनं[५] प्रणिपत्येदमब्रुवन् ।। २

देव दैत्येन घोरेण दुर्जयेन सुरासुरैः ।।
पीडिता दारुकेण स्मः स्वस्थानाच्चापि च्याविताः ।। ३

न विष्णुना न चंद्रेण न चान्येनापि केनचित् ।।
शक्यो हतुं स दुष्टात्मा अर्धनारीश्वरं विना ।। ४

तेन संपीडयमानानास्माकं शरणं भव ।।
इत्युक्त्वा रुरुदुर्देवास्त्राहित्राहिती चाब्रुवन्[६] ।। ५

ततोऽति कृपयाविष्टहरकंठस्य कालिमाम् ।।
गृहीत्वा पार्वती चक्रे नारीमेकां महाभयाम् ।। ६

आत्मशक्तिं तत्र मुक्त्वा प्रोवाचेदं वचः शुभा ।।
यस्मादतीव कालासि नाम्ना त्वं कालिका भव ।। ७

---

१ अ. श्रीशौनक ।।
२ अ. श्रुत्वा सूत ब. श्रुता सुत
३ अ. प्रती 'उवाच' नास्ति
४ 'पुरा' अ. ब. पाठः
५ अ. महासीनं
६ ब. ब्रवीत्

देवारिच दुरात्मानं शीघ्रं नाशय शोभने ।।
एवमुक्ता महारावा कालिका प्राप्य तुं तदा ।। ८

रथेणैव[1] मृतं चक्रे सानुगं स्फुटितत्ददम् ।।
ततोवन्तीश्मशानस्था महारावानमुंचत ।। ९

यैरासन्विकला लोकास्त्रयोऽपि प्रमुता यथा ।।
ततो रुद्रो बालरूपं कृत्वा विश्वकृते विभुः[2] ।। १०

रुदंस्तस्याः समीपे चाप्यागतः प्रेतसद्मनि ।।
रुदंतं च ततो बालं कृत्वोत्संगे कृपान्विता ।। ११

कालिकाऽपाययत्स्तन्यं मा रुदेति प्रजल्पती ।।
स्तन्य व्याजेन बालोऽपि पपौ क्रोधं तदंगजम् ।। १२

यो ऽसौ हरकंठभर्विग्रविषादासीत्सुदुर्धरः ।।
पीत क्रोध स्वभावे च सौम्यासीत्कालिका तदा ।। १३

बालोऽपि बालरूपं तत्त्यक्तुमैच्छत्कृति क्रियः[3] ।। १४

---

१ ब. रावेणी
२ अ. प्रभुः
३ अ. क्रियाः

ततो देवाः कालिकायाः शंकमानाः पुनर्भयम् ।।
ऊचुर्मा बाल बालत्वं परित्यज कृपां कुरु ।। १५

बाल उवाच ।।
न भेतव्यं कालिकायाः[1] सौम्या देवी यतः कृपा ।।
चतुःषष्टि क्षेत्रपालानित्युक्त्वा सो सृजन्मुखात् ।। १६

प्राह तान्बालरूपांश्च बालरूपी महेश्वरः ।।
स्वर्गेषु पंचविंशानां पातालेषु च तावताम् ।। १७

चतुर्दशानां भूलोके वासो वः पालनं तथा ।।
अयमेव श्मशानस्थो भविता श्वा च वाहनम् ।। १८

नैवेद्यं भवतां राजमाष तंदुल मिश्रकाः ।।
अनभ्यर्च्य च यो युष्मान्किंचित्कृत्यं विधास्यति ।। १९

तस्य तन्निष्फलं भावि भुक्तं प्रेतैश्च राक्षसैः ।।
इत्युक्त्वा भगवानद्रस्तैवां तरधीयत ।। २०

क्षेत्रपालाः[2] स्थिताश्चैव यथास्थाने निरूपिताः ।।
इति वः क्षेत्रपालनां सृष्टिः[3] प्रोक्ता समासतः ।। २१

---

१ अ. ब. कालिकेयाः
२ ब. ~~क्षे~~ ल
३ ब. सृष्टि

आराधनं प्रवक्ष्यामि येन प्रीता भवंति ते ।। २२

ॐ क्षां क्षेत्रपालाय नमः ।। इति नवाक्षरो महामंत्रः ।। २३

अनेनात्र चंदनादि दत्वा राजमाष[1] तण्डुल मिश्रकांश्च
चतुःषष्टि कृत भागान्वटकान्निवेद्य तावत्यो दीपिका
स्तावन्ति पत्राणि पूगानि निवेद्य दंडवत्प्रणम्य
महास्तुतिमेतां जपेत् ।। २४

ॐ ऊर्ध्वकेशा विरूपाक्षा नित्यं ये घोररूपिणः ।।
रक्तनेत्राश्च पिंगाक्षाः क्षेत्रपालान्नमामि तान् ।। २५

अह्वरो[2] ह्यापकुम्भश्च इडाचारस्तथैव यः ।।
इंद्रमूर्तिश्च कौलाक्ष उपपाद ऋतुंसनः ।। २६

सिद्धेयश्चैव वलिको नीलपादेकदंष्ट्रकः ।।
इरापतिश्चाघहारी विघ्नहारी तथांतकः ।। २७

ऊर्ध्वपादः कम्बलश्च खंजनः स्वर एव च ।।
गोमुखश्चैव जंघालो[3] गणनाथश्च वारणः ।। २८

---

१ अ. राजमाख

२ ब. अज्वरोध

३ अ. जंबालो

जटालोप्य जटालश्च नौमि स्वः क्षेत्रपालकान् ।।
ऋकारी[1] हठकारी च टंकपाणिः खणिस्तथा ।। २९

ठंठ कर्णो[2] जंबरश्च स्फुलिंगास्यस्तडिद्रुचिः ।।
दंतुरो धननादश्च नन्दकश्च तथा परः ।। ३०

फेत्कारकारी पंचास्यो बर्बरी भीमरूपवान् ।।
भग्नपक्षः[3] कालमेघो युवानो भास्करस्तथा ।। ३१

रौरवश्चापि लंबोष्ठो वणिबः सुजम्रलिकः ।।
सुगंधोहुहुकश्चैव नौमि पाताल रक्षकान् ।। ३२

सर्व लिंगेषु हुंकारः स्मशानेषु भयावहः ।।
महालक्षी वने घोरे ज्वालाक्षो वसतौ स्थितः ।। ३३

एकवृक्षश्च वृक्षेषु करालवदनो निशि ।।
घंटारवो गुहावासी पद्मखंजो जले स्थितः ।। ३४

चत्वरेषु दुरारोहः पर्वते कुरवस्तथा ।।
निर्झरेषु प्रवाहाख्यो माणिभद्रो निधिष्यपि ।। ३५

---

१ अ. हट
२ ब. टंठकर्णो
३ ब. क्ष

रसक्षेत्रे रसाध्यक्षो यज्ञवाटेषु कौष्ठिनः ।।
चतुर्दश भुवं व्याप्य स्थिताश्चैवं नमामि तान् ।। ३६

एवं चतुः षष्टिमितान्छरणं यामि क्षेत्रपान् ।।
प्रसीदंतु प्रसीदंतु[1] तुष्यंतु मम पूजया ।। ३७

सर्वकार्येषु यश्चैवं क्षेत्रपानर्चयेच्छुचिः ।।
क्षेत्रपास्तस्य तुष्यंति च यच्छंति च समीक्षितम् ।। ३८

इमं[2] क्षेत्रकल्पं च विजानन्विजयस्तथा ।।
यथोक्तविधिनाभ्यर्च्य सिद्धेयं तुष्टुवे च तम् ।। ३९

प्रणम्य च ततो देवीमानर्च वटयक्षिणीम् ।।
पुरा यदा नारदेन कलापग्रामतो द्विजाः ।। ४०

समानीतास्तैश्च सार्कं सुनंदा नाम ब्राह्मणी ।।
विधवाभ्यागता तत्र[3] तपस्तुप्तुं महीतटे ।। ४१

सा कृच्छ्राणि पराकांश्च अतिकृच्छ्राणि कुर्वती ।।
ज्येष्ठे[4] भाद्रपदे चक्रे सावित्र्या द्वे त्रिरात्रिके ।। ४२

---

१ ब. प्रसीदं

२ अ. इदं

३ ब. चात्र

४ अ. ज्येष्टे

मासोपवासं च तथा कार्तिके कुलनंदिनी ।।
सप्तलिंगानि संपूज्य देवीपूजां सदा व्यधात् ।। ४३

दर्शे स्नानं तथा चक्रे महीसागर संगमे ।।
इत्यादि बहुभिस्तैस्तै र्नित्यं नियम पालनैः[1] ।। ४४

धूतपापा ययौ लोकमुमायाः[2] कृत स्वागता ।।
अंशेन च तटे[3] तस्मिन्संभूता वट यक्षिणी ।। ४५

तस्यास्तुष्टो वरं प्रदात्सिद्धलिंग स्थितो हरः ।।
अनभ्यर्च्य य एनां च मत्पूजां प्रकरिष्यति ।। ४६

तस्य तन्निष्फलं सर्वमित्युक्तं पाल्यमेव मे ।।
तस्मात्प्रपूजयेन्नित्यं वटस्थां वटयक्षिणीम् ।। ४७

सुनंदे नंदनीयासि पूजामेतां गृहाण मे ।।
प्रसीद सर्वकालेषु मम त्वं वटयक्षिणीम् ।। ४८

एवं संपूज्य तां नत्वा क्षमाप्य वटयक्षिणीम् ।।
सर्वान्कामानवाप्नोतिनरो नारी च सर्वदा ।। ४९

---

१ ब. नै
२ अ. प्रतौ 'पार्या' इति स्यात्
३ अ. वटे

विजयश्चापि माहात्म्यमिदं जानन्महामतिः
आनर्च वट वृक्षास्थां भक्तितो वटयक्षिणीम् ।। ५०

ततः सिद्धांबिकां स्तुत्वा जप्तवान पराजिताम् ।।
महाविद्यां वैष्णवीं तु साधनेन समन्विताम् ।। ५१

यस्याः स्मरणमात्रेण सर्वदुःखक्षयो भवेत् ।।
तां विद्यां कीर्तिष्यामि श्रृणुध्वं विप्र पुंगवाः ।। ५२

ॐ नमो भगवते वासुदेवाय ।।
नमोऽनंताय सहस्त्र शीर्षाय गरुडवाहनाय[1] पीतवास से ।।
असुरदैत्य दानव यक्षराक्षस भूतप्रेत पिशाच कुंभांड ।।
सिद्धयोगिनी डाकिनी स्कंद पुरोगमान् ग्रहान्नक्षत्र ग्रहां[2] ।।
सर्वभूत वशंकर सर्वदुःख प्रभेदन जनादर्न जनानंद कर नमोऽस्तु ते स्वाहा।। ५३

इमाम पराजितां परमवैष्णवीं महाविद्यां जपति पठति श्रृणोति स्मरति।।
न सुमुदभयं न ग्रहभयं न च चौरभयं न च श्वापदभयं वा भवेत् ।। ५४

नमो नमस्तेऽस्तु [3]अभये अनघे अजिते अमृते ।।
अपराजिते पठित सिद्धे स्मरितसिद्ध एकानंशे क्षमे ।। ५५

---

१ अ. गरुद
२ ब. ग्रहं
३ ब. 'अभये.....अमृते' इदंअर्ध अ प्रतौ त्रुटितम्

ध्रुवे अरुंधति साविश्रि गायत्रि जातवेदसि ।।
ब्रह्मवादिनि कालि कपालिनि सद्यौवयवचयन करि ।।
सर्वभूतभयो प्रदवेभ्यो [1]रक्ष रक्ष स्वाहा[2] ।। ५६

यस्याः प्रणश्यते पुष्पं गर्भो वा पतते यदि ।।
म्रियंति बालका यस्याः काकवंध्या च या भवेत् ।।
धारयेत इमां विद्यामेभिर्दोषैर्न लिप्यते ।। ५७

रणे राजकुले द्युते नित्यं तस्य जयो भवेत् ।।
शस्त्र[3] धारयेते हयेषां समरे कांडधारिणी[4] ।। ५८

गुल्म शूलाक्षिरोगणां नित्यं नाशकारी तथा
शिरो रोगज्वराणां[5] च नाशनी सर्व देहिनाम् ।। ५९

महामयूरि[6] आदित्य रश्मि जाह्नवि यमघंटे किणि ।।
चिंतामणी सुरभी सुरोत्पन्ने कामधुये यथा मनीषितं ।।
कार्यं तन्मम सिध्यतु स्वाहा ॐ स्वाहा ॐ स्वाहा ।।
ॐ बले महाबले असिद्ध साधिनी स्वाहा ।। ६०

---

१ अ. रक्ष र
२ ब. स्वाहाः
३ अ. अस्त्र
४ अ. धारिणां
५ ब. ज्वरां
६ अ. महामायूरि ब. महामयू

इतीमां साधयामास वैष्णवीम पराजिताम् ।।
विजयः संयतो भूत्वा मनो बुद्धि समाधिभिः ।। ६१

य इमां पठते नित्यं साधनेन[१] विनापि च ।।
तस्यापि सर्व विघ्नानि नश्यंति द्विज[२] पुंगवाः[३] ।। ६२

*४ इति श्री स्कांदे..... महाविद्या साधनवर्णनं नाम द्विषष्टितमोऽध्यायः ।।

---

१ अ. साधने
२ अ. प्रतौ वा इतिस्यात ।
३ ब. पुंगवः
*४ अ. इति श्री स्कंदपुराणे कुमारिकाखंडे बर्बरीकोपाख्याने ।।
ब. इति श्री स्कंद पुराणे बर्बरिकोपाख्याने तृतीयषष्टशोऽध्यायः ।।